संस्कृत

१०८

श्रीरामहृदय

प्रथम अध्याय

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

६७८ | रो. ८५२४

(1)

॥ अथ श्रीरामहृदय प्रारंभः ॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(2)

श्रीगणेशायनमः श्रीमहादेवउवाच अत्रते
१ कथयिष्यामिरहस्यमतिदुर्लभं सीतारामम
रुत्सूनुः संवादंमोक्षसाधनं १ पुरारामाय
णेरामोरावणंदेवकंटकं हत्वारणेरणश्लाघी
सपुत्रबंधुवाहनं सीतयासहसुग्रीवल
क्ष्मणाभ्यांसमन्वितः अयोध्यामगमद्रामो
हनुमत्प्रमुखैर्वृतः २ अभिषिक्तः परिवृतो

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(2A)

वसिष्टाद्यैर्महात्मभिः ।सिंहासनेसमासीनः
कोटिसूर्यसमप्रभः ४ दृष्ट्वातदाहनूमंतं
प्रांजलिंप्रणतंस्थितं कृतकार्यंनिराकांक्ष
ज्ञानापेक्षंमहामतिं रामःसीतामुवाचेदं
ब्रूहितत्वंहनूमते निःकल्मषोयंज्ञानस्यपा
त्रंनौनित्यभक्तिमान् ६ तथेतिजानकीप्रा
हतत्वंरामस्यनिश्चितं हनूमंतेप्रपन्नायसी

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(3)

तालोकविमोहिनी ७ सीतोवाच रामंविद्धि
॥२॥ पदंब्रह्मसच्चिदानंदमद्वयं सर्वोपाधिविनि
र्मुक्तंसत्तामात्रमगोचरं ८ आनंदंनिर्मलंशां
तंनिर्विकारंनिरंजनं सर्वव्यापिनमात्मानंस्व
प्रकाशमकल्मषं ९ मांविद्धिमूलप्रकृतिंस
र्गस्थित्यंतकारिणीं तस्यसंनिधिमात्रेणसृजा
मीदमतंद्रिताः १० तत्सनिध्यमयादृष्टंतस्मि

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(3A)

न्नारोप्यतेंबुधैः अयोध्यानगरेजन्मरघुवंशे
तिनिर्मले ३१ विश्वामित्रसहायत्वंमखसं
रक्षणंततः अहल्याशापशमनंचापभंगोम
हेशस्तुः ३२ मत्पाणिग्रहणंपश्चाद्भार्गवस्य
मदक्षयः अयोध्यानगरेवासोमयाद्वादश
वार्षिक ३३ दंडकारण्यगमनंविराधवधमेव
च मायामारीचमरणंमायासीताहृतिस्तथा ॥३४॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(५)

जटायुषोमोक्षलाभः कबंधस्यतथैवच ।
॥३॥ शबर्यापूजनंपश्चात्सुग्रीवेणसमेवच ॥१५॥
वालिनश्चवधः पश्चात्सीतान्वेषणमेवच ।
सेतुबंधश्चजलदेर्लंकायाश्चतिरोधनं ॥१६॥
रावणस्यवधोयुद्धेसपुत्रस्यदुरात्मनः बि
भीषणोराज्यदानंपुष्पकेनमयासह ॥१७॥
अयोध्यागमनंपश्चाद्राज्येरामाभिषेचनं ।

एवमादीनि कर्माणि मयैव चरित्ताण्यपि ॥१८॥
आरोपयंति रामेस्मिन्निर्विकारेखिलात्मनि ॥
रामो न गछति न तिष्ठति नानुशोचत्याकांक्षते
त्यजति नो न करोति किंचित् आनंदमूर्तिर
चलपरिनामहीनो मायागुणान्ननुगतोहित
थाविभाति २० श्रीमहादेव उ० ततोरामःस्व
यंप्राह हनुमंतमुपस्थितं शृणुतत्वंप्रवक्ष्या

A joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(5)

॥४॥ मित्यात्मानात्मपरात्मनां २१ आकाशस्त्वय
थाभेदास्त्रिविधोदृश्यते महान् जलाशयेम
हाकाशस्तदवच्छिन्नघटेहि २२ प्रतिबिंबग
व्यम परं दृश्यते त्रिविधं नभः बुध्यवच्छिन्न
चैतन्यमेकं पूर्णमथापरं २३ आभासस्त्वपरं
ब्रह्मभूतमेवं त्रिधान्वितं साभासबुद्धेः क
र्तृत्वमवच्छिन्नेविकारिणि २४ साक्षिण्यारो

" Joint property of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(5A)

प्यतेभ्रांत्याजीवनंचयथाबुधैः आभासस्तु
मृषाबुद्धिरविद्याकार्यमुच्यते २५ अविच्छि
न्नंतुतद्ब्रह्मविच्छेदस्तुविकल्पितः अविच्छिन्न
स्यपूर्णेनएकत्वंप्रतिपद्यते २६ तत्त्वमस्या
दिवाक्यैश्चनाभासस्याहमस्तथा ऐक्यज्ञानं
यदोत्पन्नंमहावाक्येनचात्मनोः २७ तदाविद्या
स्वकार्यैश्चनश्यत्येवनसंशयः एतद्विज्ञायम

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(6)

॥५॥

द्भक्तोमद्भावायोपपद्यते २८ मद्भक्तिविमुखानां
हिशास्त्रमात्रेषुमुह्यतां नस्यानंनचमोक्षस्या
तेषांजन्मशतैरपि २९ इदंरहस्यंहृदयंममात्म
नोमयैवसाक्षात्कथितंतवानघ मद्भक्तिहीना
यशाथनत्वयादातव्यंमहेंद्रादपिराज्यतोधिकं॥३०
श्रीमहादेवउवाच॰ एतत्तेभिहितंदेवीश्रीरा
मत्हृदयंमया अतिगुह्यतमंहृद्यंपवित्रंपाप

(6A)

शोधनं ३१ साक्षाद्रामेणकथितंसर्ववेदांतसं
ग्रहं यःपठेसततंभक्त्यासमुक्तोनात्रसंशयः॥
॥३२॥ ब्रह्महत्यादिपापानिबहुजन्मार्जितान्य
पि नश्यत्येवनसंदेहोरामस्यवचनंयथा॥३३॥
जातिभ्रष्टोपिपापीपरधनपरदारेषुनित्योद्यतो
वास्तेयीब्रह्मघ्नमातापितृवधनिरतोयोगिवृं
दापकारः यःसंपूज्याभिरामंपठतिचहृदयं

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

०)

रामचंद्रायभत्तयायोगीश्वरप्यप्रभ्ययंपदमपिल
॥६॥ भंतेसर्वदेवैसपूज्य. २४ इतिश्रीब्रह्मां
डपुराणेउत्तरखंडेउमामहेश्वरसंवादेअध्या
त्मरामायणेश्रीरामहृदयसंपूर्णप्रथमोध्यायः॥१॥
॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com